Digitized by eGangotri

ज्ञानसिद्धिः

JÑĀNA-SIDDHI

Dr. R. Nagaswamy

••स्कैन्ड/ Scanned••

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

S-70

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

1. मन्त्रवादः

नवशक्तिविधिप्रोक्तं नवमूलं तु यामलम्।
तच्छाक्तं शाम्भवं शैवं तत्तत्त्वं सिद्धिशाम्भवम्॥ 1
मूलागमं तु सन्मार्गं सहमार्गं शिवागमम्।
सन्मार्गं सहमार्गं च मूलदिव्यागमोदितम्॥ 2
नवागमरहस्यार्थोद्भवोऽष्टाविंशतोदयः
शक्त्युक्तिं यामलोद्भेदं नवभेदमनेकधा॥ 3

१. पारतत्त्वरागम्
२. परमागमम्
३. शिवागमम्
४. शक्त्यागमम्
५. कलागमम्
६. देवप्रसादम्
७. पारतन्त्रावतारम्
८. शिवाज्ञासारम्
९. शिवसादाख्यप्रसादम्।

नवधा चेति संप्रोक्तो नवतन्त्रैकगोचरः।
वामश्च मन्त्रवादश्च यन्त्रावादस्ततः परम्॥ 4
तथा चौषधवादश्च कर्मवादस्तथैव च।
अद्वैतवामसिद्धान्तो द्वैतवाममतः पुनः॥ 5
मिश्रवाममतः पश्चाद्वामसिद्धान्त इत्यपि।
वामं तु त्रिविधं प्रोक्तमनादिः पूर्वपश्चिमम्॥ 6
न्यायो वैशेषिकश्चैव बौद्धश्चैवार्हतस्तथा।
लोकायतश्च साङ्ख्यश्च मीमांसो वैष्णवस्तथा॥ 7
न्यायाद्यष्टकभेदोयं बहिःस्थाः समयार्थकः।
शैवं शिवाद्वयं चैव शिवसंमेलनं त्रिधा॥ 8
पश्चात्पाशुपतं चैव कालामुखमहाव्रतम्।
वामभैरवयोर्भेदाः शैवस्याभ्यन्तराष्टकः॥ 9

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शुद्धशैवस्य सम्बन्धं जटी केशधरोऽथवा ।
शिवपूजादि कर्तव्यं भस्मरुद्राक्षधारणम् ।। 10
ज्ञानदीक्षा पञ्चगुणाः सद्गुणाः करुणोदयाः ।
ज्ञानभेदं चतुष्पादं नित्यानुष्ठानसाधकम् ।। 11
रुद्राक्षमुपवीतं च उष्णीषं चोत्तरीयकम् ।
भस्मापि शुद्धशैवानां पञ्च मुद्राः प्रकीर्तिताः ।। 12

वामं हि शाम्भवं शास्त्रं भैरवं दक्षिणात्मकम् । 13A

सन्मार्गं सहमार्गं च मूलदिव्यागमोदितम् ।
इदं शास्त्रं शिवोद्गीर्णं मूलतन्त्रावतारकम् ।। 14

कुलार्णवं कुलोत्तीर्णं कुलसम्भवं कुलामृतम् ।
परानुत्तरागमार्थं कौळिका कुळशासनम् ।। 15
सिद्धामृताम्नायसिद्धिरित्यादि शाक्तवामजम् ।
नवयामळयोर्भेदं तत्तद्भेदमनेकधा ।। 16
शाक्तेयं शाम्भवं शैवं शिवसम्बन्धकारणम् ।
त्रैसिद्धान्तमिति प्रोक्तमिदं शास्त्रं त्रिमेलनम् ।। 17
शुद्धशैवमिति ख्यातं शुद्धशाम्भवसम्भवम् । 18A

वेदस्य विहिताचारं दक्षिणाचारमुच्यते ।
विपरीतं वाममार्गं शाक्तेयं शैवगोचरम् ।। 19

नवशक्तिविधिप्रोक्तं नवमूलं तु यामलम् ।
तच्छाक्तं शाम्भवं शैवं तत्तत्वं सिद्धिशाम्भवम् ।। 20
शक्तचर्यं यामलोद्भेदं नवभेदमनेकधा । 21A

मूलागमं च सन्मार्गं सहमार्गं शिवागमम् ।
शिवसृष्टिः पञ्चमाका राश क्तचा सारैकया दश ।। 22

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वामभैरवयोर्भेदं गौतमं च गणेश्वरम्।
नन्दिकेशं तथा पश्चादैन्द्रसारं तु षोडशम्॥ 23
गौरीनरागमं पश्चान्महेशसारं ततः परम्।
अघोरसारागमं पश्चाद्विष्णुसारमतः परम्॥ 24
ब्रह्मसारं ततः पश्चात्ततः समयसारकम्।
महेश्वरोद्भवं चैव रुद्रावतारसम्भवम्॥ 25
सौन्दर्यं सिद्धसारं च महाभैरवषष्ठकम्।
सादाख्यं पार्वतीप्रोक्तं मन्त्रावतारयोनिकम्॥ 26
देवसारं दशांशं च योगसारं च सम्मतम्।
इत्यष्टाविंशतिर्भेदं मूलोपादानकारणम्॥ 27
चतुर्विंशच्छतद्वयमष्टाविंशोपभेदकम्। 28A

शिवशक्तिस्वरूपेण शैवं शाक्तं मयोदितम्।
शिवसम्बन्धतः शक्तिः शक्तिसम्बन्धतः शिवः॥ 29
षड्वक्त्रेशानसम्बन्धं षट्शक्तिप्रभवोद्भवम्।
षट्शक्तिप्रभवाकारे शैवादि समयोदितम्॥ 30
शैवं पूर्वमुखोत्पन्नं याम्ये कालामुखं तथा।
पश्चात्पाशुपतं चैवमुत्तरे तु महाव्रतम्॥ 31
तदूर्ध्वे भैरवं प्रोक्तं पाताले वाममुच्यते।
पातालशक्तिसम्बन्धं तदूर्ध्वं परमं पदम्॥ 32

पारतत्वरागम् परमागमम् शिवागमम् शक्त्यागमम्।
कलागमम् देवप्रसादम् पारतन्त्रावतारम् शिवाज्ञासारम्॥ 33
शिवसादाख्यप्रसादम्।
... ... मेद संक ... ... मष्टविद्येश्वरोदितम्॥ 34
एतेषां विंशतिर्भेदाः सारतन्त्रावतारकम्।
सन्मार्गं सहमार्गं च मूलदिव्यागमोदितम्॥ 35

मूलाष्टाविंशतिः शास्त्राज्ञातं सर्वत्र कारणम्।
सद्यं वाममघोरं च पुरुषेशानपञ्चमम्॥ 36

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्तत्प्रोक्तमतं शास्त्रं कामिकाद्यष्टविंशतिः । 37A

कालोत्तरादि यद्भिन्नं तन्मूलस्योपभेदकम् ।
कामिकादि विभेदार्थं शतद्वयं तथाधिकम् ।। 38
वेदसारागमं शास्त्रं वेदान्तं चागमान्तकम् । 39A

अनन्तागमयोर्मध्ये सारात्साराष्टविंशतिः ।
तन्मूलागमतद्भेदा नवधा मूलकल्पना ।। 40
तत्तत्सारांशसारार्थं तन्त्रावतारशास्त्रकम् ।
वेदागमरहस्यार्थे वेदागमान्तविस्मयम् ।। 41
शुद्धशैवप्रकाशार्थं शुद्धशाम्भवसम्भवम् ।
शुद्धशैवस्तथा सारसारात्सारप्रकाशितम् ।। 42
सारात्सारतरं गुह्यं गुह्याद्गुह्यं प्रकाशितम् ।
शाक्तस्य शाम्भवं शैवं शैवं शाम्भवशाक्तकम् ।। 43
वेदान्तसिद्धान्तविज्ञानगम्यं वेदान्तसिद्धान्तकमेव तत्वम् ।
वेदान्तसिद्धान्तविभेदभिन्नं वेदान्तसिद्धान्तविश्रान्तिकं च ।। 44
शुद्धशैवः स्वसिद्धान्तमिदं शास्त्रप्रवर्तकम् । 45A

न्यायं वैशेषिकं चैव बौद्धं चैवार्हतं तथा ।
लोकायतं च सांख्यं च मीमांसा वैष्णवं तथा ।। 46
एवमष्टौ बहिर्भेदाः बाह्याभ्यन्तर षोडश ।
शैवं शिवाद्वितं द्वेधा शिवसंमेलनं त्रयम् ।। 47
चतुर्थं पाशुपत्यं च पञ्चमं तु महाव्रतम् ।
षष्ठं कालामुखं चैव सप्तमं भैरवं तथा ।। 48
अष्टमं वामभेदोऽथ समयेत्यष्टमं भवेत् ।
एवमष्टौ बहिर्भेदा बाह्याभ्यन्तर षोडश ।। 49

भेदाभेदोभयज्ञानं मायावादप्रधानकम् ।
मन्त्रं यन्त्रं च चक्रं च कालः प्रारब्धकर्म च ।। 50

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

... ... न्येय यवादिन ... ।
अष्टवादमिदं प्रोक्तं त्रियष्टश्चतुर्विंशतिः ।। 51
तीर्थशास्त्रप्रमाणं च अर्चनाध्यात्मपञ्चमाः ।
बाह्याभ्यन्तरयोर्भेदाः संकल्पाः षट्प्रभेदकाः ।। 52
... भेदाः षोडश समयास्तथा ।
ब्रह्मविद्यादिवादी च तत्त्ववादस्तु शून्यकः ।। 53
एवं पञ्चशिवोत्पन्नं श्रुत्वाऽऽगमान्यतन्त्रजम् ।
अष्टाविंशत्प्रभेदार्थं मायाकुण्डलिनोद्भवम् ।। 54
वेदान्तं तत्त्वविज्ञानं तत्सिद्धान्तस्य साधनम् ।
वेदान्तार्थमयं ज्ञानं तज्ज्ञानं परमं पदम् ।। 55

अष्टाविंशतिज्ञानांशमेव मूलोदितागमम् ।
एवं शैवं त्रिधा भेदं चतुष्पादभवाश्रयम् ।। 56
चर्यादि ब्रह्मचर्यादि सिद्धान्ताश्रम उच्यते ।
ऊर्ध्वशैवं महाशैवं नादिशैवादिशैवकम् ।। 57
भेदाभेदद्वयं शैवं गुणशैवानुशैवकम् ।
आज्ञाशैवं क्रियाशैवमवान्तरं योगशैवकम् ।। 58
ज्ञानशैवं शिवशैवं शैवभेदं चतुर्दश ।
शुद्धशैवं तथामुख्यं चतुष्पाद्प्रणवान्तकम् ।। 59

शुद्धशैवं स्वसिद्धान्तं शैवभेदं किमुच्यते ।
अनादिशैवं मिश्रं च मिश्रामिश्रं त्रिधा हि च ।। 60
गुणशैवं चतुर्थं च पञ्चमान्तरभेदकम् ।
महाशैवं षष्टकं तु भेदशैवं तु सप्तमम् ।। 61
अभेदं चाष्टमं विद्यात् योगशैवं नवं तथा ।
ज्ञानशैवं दशं विद्यादूर्ध्वमेकादशं भवेत् ।। 62
द्वादशं त्वाज्ञाशैवं स्यादनुशैवं त्रयोदशम् ।
अध्वशैवं चतुर्दश्यां तत्वशैवं तथान्यथा ।। 63
षोडशं शुद्धशैवं च शैवभेदमिति स्थितम् । 64A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमित्यथ पंच च।
दिग्वाय्वर्कजलाध्यक्षाश्विनस्तत्राधिदेवताः ॥ 120
मनो बुद्धिरहङ्कारश्चित्तं चैति चतुष्टयम्।
भूतेभ्यः सात्विकेभ्योऽभूत् क्रमात्तत्राधिदेवताः ॥ 121
राजसेभ्यस्तु भूतेभ्यो भवेद्वागादिपंचकम्।
वाक्पाणिपादसंज्ञानि पायूपस्थौ तु देवताः ॥ 122
अग्नीन्द्रोपेन्द्रमृत्युश्च क्रमादेव प्रजापतिः।
एतेभ्यश्चैव भूतेभ्यः प्राणाद्याः पंच वायवः ॥ 123
प्राणोऽपानस्तथा व्यान उदानश्च समानकः।
पंचीकृतानि भूतानि तमोभूतोद्भवानि वै ॥ 124
पुनश्च कुत्रचिच्छ्रोत्रादिचतुर्दशकरणानामधिपतयः।
दिक्वातार्कप्रचेता ... ... इन्द्रोपेन्द्रमृत्युकाः ॥ 125
चन्द्रो विष्णुः चतुर्वक्त्रः शङ्करश्चेति निश्चिताः। 126A
अग्नीन्द्रोपेन्द्रमित्रश्च क्रमादेव प्रजापतिः।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः ॥ 127

पृथिव्यप्तेजसी वायुराकाशं भूतपंचकम्।
ब्रह्मा विष्णुस्ततो रुद्र ईश ईशानकारणम् ॥ 128

शब्दादिपंचतन्मात्रे आकाशादिसमुद्भवम्।
आकाशाद्वायुरुत्पन्नो वायव्ये दहनोद्भवम् ॥ 129
दहने जलमुत्पन्नं जले मेदिनिसंभवम्।
पञ्चेन्द्रियग्रहावस्थाः पुरुषस्तत्त्वं उच्यते ॥ 130
अस्थि मांसत्वचं मेदो रोम मेदिनिपंचकम्।
अन्न प्राणमनो विज्ञान आनन्दैः पञ्चकोशकम् ॥ 131
जाग्रत्स्वप्न सुषुप्तं च तुर्यातीतं च पञ्चकम्। 132A

इडा च पिङ्गला चैव सुषुम्ना च तथैव च।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ॥ 133

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अलम्बुषा कुहूश्चैव शङ्खिनी दश नाडिका:।
तत्र देहे समाख्यातं सूर्य सोमाग्नि मण्डलम् ।। 134
आणवदिमलं त्रेधा सात्विकादि गुणास्त्रिधा। 135A

पंचविंशति: पुरुष: परस्परं च व्योमकम्।
व्योमातीताष्टविंशतिरित्येवं तत्वनिर्णयम् ।। 136
मूलप्रकृतिरव्यक्तं अव्यक्तात् तु महान्भवेत्।
व्यक्ते चित्तं तदुत्पन्नं चिन्तितं चित्तरूपकम् ।। 137

सर्ववेदागमार्थस्य यत्सारं तत्परात्परम्।
यत्तत्वं तत्पराकारं परबिन्दूद्भवं तत: ।। 138
परात्परादि नादान्तं द्वादशं तत्वमुच्यते।
परात्परात्परोत्पन्ना पराशक्तिस्तदुद्भवा ।। 139
इच्छाज्ञानक्रियाशक्तिस्तत्पराशक्तिसम्भवा।
ज्ञानेच्छास्वक्रियामद्ये शिवशक्तिसदाशिवम् ।। 140
नादबिन्दुविभेदोक्तं षट्तत्वं तत्प्रकाशितम्।
सदाशिवान्महेशस्य मध्ये रुद्रोद्भवं तथा ।। 141
रुद्रोत्पत्तिर्यथा बिष्णुस्तथा उत्पन्न आत्मभू:।
सृष्टिकालविधानोक्तं सर्वतत्वप्रकाशितम् ।। 142
तन्मध्ये द्रुहिणादीनां चतुष्कं सकलोद्भवम्।
सादाख्यं बिन्दुनादोक्तं सकलाकलमुच्यते ।। 143
शिवं शत्किपरं त्रीणि परात्पर चतुर्थकम्।
इच्छाज्ञानक्रियात्मानं नि ... ... कीर्त्यंते ।। 144
त्रिवर्गविस्तीर्णम (ध्य) (स्य) स्थे आत्मविद्याशिवत्रयम्।
षट्त्रिंशत्तत्वभेदोक्तं तन्त्राण्युद्भवसाधनम् ।। 145
एकान्ते अवश्तितश्चासौ शिवशक्ति समन्वित:। 146A

शिवं परात्परं सूक्ष्मं नित्यं सर्वगताव्ययम्।
अनिन्दितमनौपम्यमप्रमेयमनामयम् ।। 147

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शुद्धत्वाच्छिवमुद्दिष्टं परादूर्ध्वं परात्परम् ।
परात्पराशक्तिरुत्पन्ना ज्ञानशक्तिस्तदुद्भवा ।। 148

शिवमध्यगतं शान्तं शान्त्यतीतं परात्परम् । 149A

अकारश्च उकारश्च मकारो बिन्दुरेव च ।
अर्धचन्द्रनिरोधी च नादान्त एव च ।। 150
शक्तिश्च व्यापिनी चैव व्योमरूपा तथैव च ।
अनन्ता च तथाऽनाथाऽनाश्रिता समना तथा ।। 151
उन्मना च तदन्तश्च पराशक्तिः परान्तकम् ।
परशिवं तदन्तश्च शाम्भवं गुरुपादुका ।। 152
शिवः शाम्भव इति ज्ञेयो द्वाविंशद्भेद उच्यते ।
शिवान्तान्तैकविंशच्च शिवान्तो विंशत्कला तथा ।। 153
परान्ताष्टादश प्रोक्ता उन्मन्यन्ते तु षोडश । 154

बिन्दुतत्त्वं तथा मध्ये वैखर्यादि समुद्भवः ।
वैकरी मध्यमा चान्या पश्यन्ती सूक्ष्मसंज्ञिता ।। 155
व्योम वागीश्वरी संज्ञा पञ्चशक्तिसमुद्भवा ।
अतिसूक्ष्मा तथा भेद चतुर्णामपि कारणम् ।। 156

बैन्दवं कुण्ठलीव्याप्तं बिन्दुनादोदयोदितम् ।
बैन्दवं तत्वमध्यास्ते बिन्दुनादकलोदितम् ।। 157
बिन्दुनादकलामध्ये अकारादिसमुद्भवम् ।
अकारोकारमकारश्च बिन्दुनादत्रिपञ्चमम् ।। 158
कलाध्वा मध्यमे भागे पंचाध्वा चैवमुद्भवम् ।
अकारे बैखरी जाता उकारे मध्यमोदिता ।। 159
मकारे पश्यन्ती जाता बिन्दौ सूक्ष्मा तथोदिता ।
नादाच्चैवातिसूक्ष्मा वाक् जाता पंचकलोदिता ।। 160

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

निवृत्यादि कलारूपा अकारादिकलोदिता।
षट्त्रिंशत्तत्वसंभिन्ना कुटिलाशक्तिरुद्भवा ।। 161
कुटिला कुण्डली व्याप्ता कुण्डली प्रणवोदिता।
जाता कुण्डलिनी शक्तिर्माया कर्मानुसारिणी ।। 162
नादबिन्द्वादिकं कार्यं तस्या इति जगत्स्थितिः।
कुटिला कुण्डली बिन्दुरिच्छाज्ञानक्रियोदिता ।। 163
परात्परादि नादान्तं द्वादशं तत्वं उच्यते ।। 164A

क्षित्यादि कुटिलान्तानि षट्त्रिंशत्तत्वरूपकम्।
शिवेच्छया कुटिलोत्पन्नं नादतत्वं प्रधानकम् ।। 165
नादमध्योदितो बिन्दुः शिवशक्त्यर्थनामकः।
नादे तु ज्ञानमुत्पन्नं कालेन शिवतत्वकम् ।। 166
बिन्दुक्रियासमुत्पन्नः कालो नाम स्वशक्तिकम्।
ज्ञानक्रियासमावेशं सादाख्यं तत्वमुच्यते ।। 167
ज्ञानन्यूनं क्रियाधिक्यं महेशस्तत्वविग्रहः।
ज्ञानाधिक्यं क्रियान्यूनं शुद्धविद्या प्रकाशिता ।। 168
शुद्धविद्येशसादाख्यं बिन्दुनादं च पंचकम्।
शिवतत्वमिति प्रोक्तं बैन्दवं तत्र कारणम् ।। 169
बिन्दुशक्त्युद्भवं माया मोहिनी मोहकारणम्।
मायोत्पन्नस्तथा कालस्त्रिकृत्यर्थविभेदकः ।। 170
कालस्योत्पन्ननियतिर्यत्तु कर्मसु निश्चयः।
कला नियतिरुत्पन्ना किंचि ... ... ।। 171
कलोत्पन्ना तथा विद्या नानाज्ञानोद्भवात्मिका।
रागोऽपरितौषार्थं तु विद्या तत्वे च षष्टकम् ।। 172
विषयग्रहणे काले पुरुषः पञ्चकंचुकः।
अविद्यातत्वमवव्यक्तकाले मूलप्रकृत्यर्थकम् ।। 173
मूलप्रकृतिरव्यक्तं व्यक्तं चित्तं महान्त्रिधा।
पुरुषः कंचुको बुद्धिरष्टप्रकृतितत्वकम् ।। 174

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अष्टप्रकृतयस्तत्वसूक्ष्मपुर्यष्टकं तथा।
मायायुक्तं तद्व्यक्तं तद्व्यक्तं तु महानिति ।। 175
व्यक्ते तु चिन्तितं चित्तं बुद्धिर्निर्णयरूपिका।
बुद्धिमध्ये ह्यहङ्कारमुद्भूतं तत्तृतीयकम् ।। 176
अहङ्कारे गुणोत्पन्नं तस्मात्सत्वं रजस्तमः।
तत्त... ... तेजसाहन्ता मध्ये मानसमुद्भवम् ।। 177
ज्ञानकर्मेन्द्रियाकारं वैखर्यन्तं द्वयोद्भवम्।
शब्दादि पञ्चतन्मात्रं भूताहन्ततयोद्भवम् ।। 178
शब्दादिपञ्चतन्मात्रे आकाशादिसमुद्भवम्।
आकाशाद्वायुरुत्पन्नो वायव्ये दहनोद्भवः ।। 179
दहने जलमुत्पन्नं जले मेदिनिसम्भवः।
अन्तर्यामी तथा मुख्यः प्रपञ्चो वै रवस्तथा ।। 180

भूतवर्णं च कोशं च बाह्या वै पञ्चविंशतिः।
आभ्यन्तरं पञ्चविंशद्वातभेदाश्चतुर्दश ।। 181
मलत्र्यं गुणास्त्रीणि आधारषट्कमात्मनः।
अवस्थापञ्चकं चैव तत्वं षण्णवतिस्तथा ।। 182
तत्वनिर्णयसिद्धान्तं श्रृणु हैमवतीश्वरि।
आत्मतत्वं चतुर्विंशदात्ममध्ये लयोदितम् ।। 183
विद्यातत्वं तथा पंच मायामध्ये लयोदितम्।
शिवतत्वं तथा पंच नित्यं सत्यस्य साधनम् ।। 184
शुद्धविद्येशसादाख्यं बिन्दुनादे लयोदितम्।
बिन्दुनादं द्विधा तत्वं कुटिलायां लयोदितम् ।। 185
कुटिला कुण्डली बिन्दुरिच्छाज्ञानक्रियोदितम्।
इच्छाज्ञानक्रियाशक्तेः सर्वत्र जगदुद्भवः ।। 186
इच्छाज्ञानक्रियाशक्तिः पराशक्तिलयोदितम्।
परापरविधाशक्तिः शिवतेजोमयोदितम् ।। 187
शिवमत्यन्तसंभिन्नं जातनाशविनाशनम्।
अणौ महति तद्व्याप्तं सर्वात्मनां लयः प्रभुः ।। 188

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

जगच्छक्तिमयं व्याप्तं जगच्छक्तिमयं शिवम्।
जगदुत्पद्यते शक्तेः शक्तिस्तु परमः शिवः॥ 189
एवं तत्वलयं सूक्ष्ममेकं तत्वप्रवर्तकम्।
एवं तत्वविधानोक्तमेवं तत्वस्य निर्णयम्॥ 190

आत्मतत्वं चतुर्विंशदात्ममध्ये लयोदितम्।
विद्यातत्वं तथा पंच (?) मायामध्ये लयोदितम्॥ 191
मूलप्रकृतिरव्यक्तं व्यक्तं चित्तं महान्त्रिधा। 192A
पुरुषः पंचकंचुक इत्यर्थं तत्वमुद्भवम्।
पुरुषः कंचुको बुद्धिरष्टप्रकृतितत्वकम्॥ 193
अष्टप्रकृतयस्तत्वसूक्ष्मपुर्यष्टकं तथा।
बिन्दुशक्त्युद्भवं माया मोहिनी मोहकारणम्॥ 194

क्षित्यादिकुटिलान्तानि षट्त्रिंशत्तत्वरूपकम्।
शिवेच्छया कुटिलोत्पन्नं नादतत्वं प्रधानकम्॥ 195
विद्यातत्वं तथा पञ्च मायातत्वे लयोदितम्।
शिवतत्वं तथा पञ्च नित्यं सत्यस्य साधनम्॥ 196
अशुद्धं भोगखण्डं च आत्मतत्वस्य नामकम्।
मिश्रं भोजयितृ खण्डं विद्या तत्त्वार्थनामकम्॥ 197
प्रेरकं शुद्धखण्डं च शिवतत्वस्य नामकम्।
शद्धविद्येशसादाख्यं बिन्दुनादे लयोदितम्॥ 198

बिन्दुनादं द्विधा तत्वं कुटिलामध्ये लयोदितम्।
कुटिला कुण्डली बिन्दुरिच्छाज्ञानक्रियोदिता॥ 199
सृष्टिकाले त्रिबिन्द्वर्थे त्रिकोणाकारसम्भवम्।
तन्नादादिधरण्यन्तं षट्त्रिंशत्तत्वरूपकम्॥ 200
क्षित्यादिकुटिलान्तं तु शट्त्रिंशत्ततत्वरूपकम्। 201A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मूलाधारं चतुष्पत्रं तन्मध्ये वशषस्थजम् ? ।
तन्मध्ये कुटिलाकारं त्रिकोणाकारसम्भवम् ।। 202
नाडीमूला वृताङ्गा हि कुण्डली हंसनिस्वना ।
कुण्डल्याकारमध्यस्थे प्राणं प्रणवसम्भवम् ।। 203

यथा कुण्डलिनी शक्तिर्मायाकर्मानुसारिणी ।
नादबिन्द्वादिकं कार्यं तस्या इति जगत्स्थितिः ।। 204
नादबिन्दुविभेदोक्तं षट्तत्वं तत्प्रकाशितम् ।
पृथ्व्यादिकुटिलान्तं तु तत्वं कुण्डलिनोदयम् ।। 205

नादबिन्दुविभेदोक्तं षट्तत्वं तत्प्रकाशितम् ।
अकारोकारमकारश्च बिन्दुनादस्तदन्तकम् ।। 206
षट्कलाशक्तिमध्यस्थे वैखर्यादिसमुद्भवम् ।
बैन्दवं तत्वमध्यास्ते बिन्दुनादकलोदितम् ।। 207
बिन्दुनादकलामध्ये अकारादिसमुद्भवम् ।
निवृत्यादिकलारूपा अकारादिकलोदिता ।। 208

पंचकृत्यं तदाकारं पंचवाग्वृत्तिकारणम् ।
पंचमाक्षरसंभिन्नं सर्वं बैन्दवमुद्भवम् ।। 209
अध्वषट्कमिति प्रोक्तं सर्वं पंचकलामयम् ।
बिन्दुमध्ये तथा नादं बिन्दुनादद्वयोदितम् ।। 210
बिन्दुनादस्तथा मध्ये निवृत्यादिकलोदयम् ।
निवृत्यादिकलामध्ये वैखर्यादिसमुद्भवम् ।। 211
वैखरी मध्यमा चान्या पश्यंती सूक्ष्मसंज्ञिका ।
तथा वागीश्वरी संज्ञा पञ्चशक्ति समुद्भवा ।। 212
अतिसूक्ष्म तथा भेद चतुर्णामपि कारणम् ।
वेखरी श्रोत्र विषया सविकल्पा तु मध्यमा ।। 213
निर्विकल्पा तृतीया च आसां कारणं अन्तिमा ।
महा सूक्ष्मा बोधरूपा इति वाक् पञ्चमोद्भवाः ।। 214

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नादाच्चैवाति सूक्ष्मा जाता पञ्च कलोदिता।
वैन्दवस्थानमध्यस्थे इच्छाज्ञानक्रियोद्भवम्॥ 215
विज्ञानादित्रयोत्पन्नमीशानादित्रयोद्भवम्।
कारकत्रयसभ्भिन्नं तत्वत्रयसमुद्भवम्॥ 216
कारकत्रयसम्बन्धादधः सर्वसमुद्भवम्।
बिन्दुभेदमिति प्रोक्तं तद्भेदं पञ्चविंशतिः॥ 217
चतुर्विंशत्तथाभेदं नादरूपं कलामयम्। 218A

सूक्ष्मवाग्भवमित्यर्थं वाग्रूपं शक्तिषष्ठकम्।
व्योमा बागीश्वरी शक्तिः पञ्चवाहक्रमादिकम्॥ 219
उत्तरर्नुत्तरव्याप्तं पूर्वपाश्चिम ऊर्ध्वकम्।
दिशः पञ्च तथा शक्तिरुद्रत्वं व्योमशक्तितः॥ 220
तत्र कुण्डलिमध्ये तु नादबिन्दुद्वयोद्भवम्।
तत्र कुण्डलिमध्ये तु अपराख्या परापरा॥ 221
मायायुक्तं तदव्यक्तं तद्व्यक्तं तु महानिति।
आणवे जायते माया मायायां कालसम्भवः॥ 222
आणवं कुटिला शक्तिर्मायातत्वमयोदितम्।
आणवान्माययोत्पन्नं तद्गुणं तु प्रकाशकम्॥ 223
माया कुण्डलिनी व्याप्तं जगदेतच्चराचरम्।
आणवान्तर्गतं तत्वं बिन्दुनादकलात्मकम्॥ 224
शिवतत्वमिति प्रोक्तं प्रेरकं तदिहोच्यते।
नादमध्योदितो बिन्दुः शिवशक्त्यर्थनामकम्॥ 225

षट्त्रिंशत्तत्वसंभिन्ना कुण्डली शक्तिरुद्भवा।
कुटिला कुण्डिली व्याप्ता कुण्डली प्रणवोदिता॥ 226
जाता कुण्डलिनी शुक्तिर्मायाकर्मानुसारिणी॥

नानावेदागमाद्यर्थं नानाशास्त्रार्थदर्शनम्।
नानाशब्दप्रवाहार्थं बैन्दवः खल्विहोदितः॥ 227

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

बैन्दवं कुटिला व्याप्तं बिन्दुनादोदयोदितम् ।
बैन्दवं तत्वमध्यास्ते बिन्दुनादकलोदितम् ॥ 228
बिन्दुनादकलामध्ये अकारादिसमुद्मवः ।
अकारोकारमकाराश्च बिन्दुनादत्रिपञ्चकम् ॥ 229
कलाध्वा तन्मध्यमे भागे पद्चाध्वा चैवमुद्भवम् ।
अकारे बैखरी जाता उकारे मध्यमोद्भवा ॥ 230
मकारे पश्यती जाता बिन्दौ सूक्ष्मा तथोदिता ।
नादाज्ज्ञातातिसूक्ष्मा वाक् वाक् पंचमकलोदिता ॥ 231

चिच्छक्तिर्ज्ञानपरा चिच्छक्तिः कुण्डली परा । 232A
तत्क्रियाशक्तिकरूपत्वं चिदचिद्बैन्दवं तथा ।
इच्छाशक्तिर्बैन्दवं तच्चिदचिन्मिश्रकैरिति ॥ 233
इच्छाज्ञानक्रियाशक्तेः सर्वत्र जगदुद्भवः ।
इच्छाज्ञानक्रियाशक्तिः पराशक्तिलयोदितम् ॥ 234
पराऽपरा द्विधा शक्तिः शिवतेजोमयोदिता ।
शिवमत्यन्तसंभिन्नं जातनाशविनाशनम् ॥ 235
अणौ महति तद्व्याप्तं सर्वात्मनां लयः प्रभु- ॥ 236A

बिन्दुशक्त्योद्भवं माया मोहिनी मोहकारणम् ।
शिवान्तान्तैकविंशच्च शिवान्तो विंशत्कला तथा ॥ 237

पृथिव्यादिशिवान्तानि षट्त्रिंशत्तत्वसाधनम् ।
तन्मध्ये बिन्दुतत्वार्थे त्रिकोणगुणसम्भवम् ॥ 238
तदग्रोभयकोणैश्च विज्ञानादि त्रिसाधनाम् ॥ 239
बिन्दुर्भिद्यति नादेन तत्काले त्रीण्यणूद्भवम् ।
अनादिकाले क्रियात्मानं कुटिला कुण्डलिनीं स्थितम् ॥ 240
बिन्दुशक्तिविभेदांशे बैन्दवं भावमाचरेत् ।
तत्काले मलसम्बन्धं तत्सृष्ट्यादि तथोदितम् ॥ 241

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विज्ञानात्मा चतुर्थश्च प्रलयात्मा त्रिभेदकः ।
सकलात्मा त्रिभेदश्च तस्मात्त्रेधा दशा विधाः ॥ 242

अनाद्यं कुटिला व्याप्तं पाशः पंचमलोदितः ।
नादबिन्दुद्वये नाशे भवे ... ... पंचकम् ॥ 243
शक्तिमध्यस्थ इच्छाज्ञानादिकोद्भवम् ? । 244A
आत्मना क्रियया बद्धं यत्तद्बिन्दुस्वरूपकम् ।
ज्ञानक्रियासमप्राप्तं सादाख्यं तत्वसम्भवम् ॥ 245
ज्ञानन्यूनं क्रियाधिक्यं तत्वमीश्वरकारणम् ।
क्रियान्यूनाधिकं योगं रुद्रांशं शुद्धपंचकम् ॥ 246
एवमात्मनि सम्भिन्नमाणवे ग्रन्थिरुद्भवः ।
आणवान्तर्गतं तत्वं बिन्दुनादकलात्मकम् ॥ 247
बिन्दोर्विवेके सहसाच्छिद्यते मलकम्बुकम् ।
मायाविवेके तु यथा धर्माधर्मतुषक्षयः ॥ 248
रुद्राणुरुक्तः प्रकृतेर्विवेके भार्गवागमे ।
निवृत्यादि पंचमांशे षडध्वोत्पत्तिसम्भवः ॥ 249
शिवशक्तिर्द्विधा तत्र शिवादन्या चिदात्मिका ।
जडात्मिका शिवादन्या जगत्कारणरूपिणी ॥ 250

यथा स्वतः शुभ्रः पटः धौतः । अन्नलिप्तो घट्टितः । मष्याकारयुक्तो लाञ्छितः । वर्णपरिपूरितो सञ्जितः । इत्यवस्था चतुष्टयमेकस्यैव चित्रपटस्य । तथा परमात्मा मायातत्कार्योपादिरहितः । शुद्धमायोपहितः ईश्वरः । अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः । पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपहितो विराट्पुरुषः । इत्यवस्थाचतुष्टयमेकस्यैव परमात्मनः । अस्मिंश्चित्रपटस्थानीये परमात्मनि चित्रस्थानीयस्थावरजङ्गमात्मको निखिलः प्रपंचः । यथा चित्रार्पितमनुष्याणां, चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते तथा परमात्माध्यस्तदेहिनां अधिष्टानचैतन्यसदृशाः चिदाभासाः कल्प्यन्ते । ते च जीवनामानः संसरन्तीति । अध्यात्मं तु विश्वतैजसप्राज्ञभेदेन त्रीणि रूपाणि । तत्र सुषुप्तौ विलीनेऽन्तःकरणे अज्ञानमात्रसाक्षी प्राज्ञ आनन्दमय इहोक्तः । स्वप्ने समष्टिसूक्ष्मशरीराभिमानी तैजसः जागरे व्यष्टिस्थूलशरीराभिमानी

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विश्वः। तत्र माण्डूक्यश्रुतिः। अहमनुभवे प्रकाशमानस्यात्मनो विश्वतैजसप्राज्ञतुर्यावस्थाभेदरूपं पादचतुष्टयं सोऽयमात्मा चतुष्पात् इत्युपक्षिप्य पूर्वपूर्वुपादप्रविलापनेन निष्प्रपंचब्रह्मात्मक तुरीयपादप्रतिपत्तिसौकर्याय स्थूलसूक्ष्मसूक्ष्मतरोपाधीन् विराडादीन् विश्वादिष्वन्तर्भाव्य जागरितस्थानो बहिः प्राज्ञः इत्यादिना विश्वादिपदानि न्यरूपयत्। अतः प्राज्ञशब्दे आनन्दमये ऽव्याकृतस्येश्वरस्यान्तर्भावं विक्षितत्वात्तत्र सर्वेश्वरत्वादितद्धमर्मवचनमिति। इत्थमेव भगवत्पादैर्गौडपादीयविवरणे व्याख्यातम्।

दृग्दृश्यविवेके तु चित्रदीपव्युत्पादितं कूटस्थं जीवकोटौ अन्तभार्व्य चित्रत्रैविध्यप्रक्रियैवावलम्बिता इति विशेषः। तत्र मुक्त जलाशयतरङ्गबुद्बुदन्यायेन उपर्युपरि कल्पनाज्जीवस्त्रिविधः पारमार्थिको व्यावहारिकः प्रातिभासिकश्चेति। तत्रावच्छिन्नः पारमार्थिकः जीवः तदवच्छेदकस्य कल्पितत्वेन ब्रह्मणोऽभिन्नत्वात्। तमावृत्य स्थितया मायया कल्पितेऽन्तःकरणे चिदाभासोऽन्तःकरणतादात्मम्यापत्या अहमित्यभिमन्यमानो व्यावहारिकः। तस्य मायिकत्वेऽपि यावद्व्यवहारमनुवृत्तेः स्वप्ने तमप्यावृत्य स्थितया मायावस्थाभेदरूपया निद्रया कल्पिते स्वप्नदेहादौ अहमित्यभिमानी प्रातिभासिकः। स्वप्नप्रपञ्चेन सह तद्दृष्टस्य जीवस्यापि प्रबोधे निवृत्तेरिति। क्वचिच्चैतन्यं सप्तधा भिद्यते इत्युच्यते।

शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च।
प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥ 251
सप्तधा भिद्यते चैवं चैतन्यं व्यावहारिके।
मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते ॥ 252
मायासम्बन्धकांशोऽयं जीवो विद्यावशस्तथा।
अन्तः करणसम्बन्धः प्रमातेत्यभिधीयते ॥ 253
तदा तद्वृत्तिसम्बन्धः प्रमाणमिति कथ्यते।
विषयागतचैतन्यं प्रमेयमिति कथ्यते ॥ 254
इष्टानिष्टफलावाप्तौ फलचैतन्यमुच्यते। इति 255A

त्वं पदमात्मरूपं तु तत्पदं परमात्मनः।
असिपदं तयोरैक्यमेवं तत्वमसिक्रमः ॥ 256
असिपदं शिवरूपं द्वयोरैक्यं प्रकाशितम्। 257A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

जीवावस्था परावस्था शिवावस्थावसान्तकम् ।
नवतत्वं नवावस्था नवावस्थान्तगः शिवः ।। 258
ब्रह्मा विष्णुश्च रूद्रश्च ईश्वरश्च सदाशिवः ।
परबिन्दुः परो नादः पराशक्तिः परः शिवः ।। 259
नवतत्वलयस्थाने नृत्तानन्दमयो गुरुः ।
नृत्तानन्दपरा विद्या नृत्तान्तं वागगोचरम् ।। 260

एकैकविषयग्राह्यावस्थः पुरुषतत्वकः ।
त्रिखण्ड जीवब्रह्मार्थमेकीभावस्थितः ... ।। 261
... संशयतः प्राज्ञा तदात्मा परसंस्थितः ।
तत्कालपरनामानि तत्तत्तत्वस्य कारणम् ? ।। 262
तत्प्रज्ञाभावसंसिद्धं शुद्धकेवलसंस्थितम् ।
परमे व्योम्नि सिद्ध्यर्थं जीवन्मुक्तिप्रकाशकम् ।। 263
तत्प्रकारस्वचैतन्यं परमात्मन्यवस्थितम् ।
परावस्थाप्रकाशस्तु अवस्थातीतगोचरम् ।। 264
आकाशशरीरं ब्रह्म तुर्यातीतं परं शिवम् ।
अणुर्महत्वं तद्व्याप्तं जीवात्मपरयोदितम् ।। 265
एतदर्थं तदर्थं च तत्परं परमं पदम् ।
विश्वग्रासपरं गुह्यं सर्वात्मशिवमुद्भवम् ।। 266
तत्सर्वं व्याप्तिसंयुक्तं तच्छून्यं व्याप्तिसम्भवम् ।
तच्छिवावस्थितं शान्तं शान्त्यतीतं परात्परम् ।। 267
... ज्ञप्तितः प्राप्तं परजीवैक्यसाधनम् ।
आत्मा परशिवश्चैते त्रिपदार्थस्त्रिचेतनाः ।। 268
आत्मजाग्रं परजाग्रं शिवजाग्रं त्रिजाग्रकम् ।
आत्मस्वप्नं परस्वप्नं शिवस्वप्नं त्रिस्वप्नकम् ।। 269
आत्मसुप्तिः परसुप्तिः शिवसुप्तिस्त्रिसुप्तिकम् ।
आत्मतुर्यं परतुर्यं शिवतुर्यं त्रितुर्यकम् ।। 270
एवं द्वादशधा भिन्नं दशावस्थाः प्रकल्पिताः ।
जाग्रज्जाग्रं जाग्रत्स्वप्नं जाग्रत्सुषुप्तिस्तृतीयकम् ।। 271

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

जाग्रतुर्य चतुर्थं च तत्कालपरपञ्चमम्।
विश्वग्रासाष्टमं चैव उपशान्तो नवस्तथा ।। 272
शिवभ्रष्टा दशं चैव इत्यावस्था दशोरिताः। 273A

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्व बोधो न विद्यते ।। 274

परात्परतरं ज्ञेयं गुरुरूपं प्रकाशकम्।
गुरुत्पन्नं शिवं साक्षाच्छिवोत्पन्नं ब्रह्म व्योमकम्।। 275
व्योमोत्पत्तिः परमात्मा परमोत्पत्तिरात्मनः।
आत्मनोत्पत्तिरव्यक्तमव्यक्ताज्जायते महान्।। 276
महतोत्पत्तिरहङ्कारः अहङ्कारे गुणत्रयम्।
गुणत्रये क्रियामूर्तिर्मूर्त्यर्धे तु जगत्त्रयम्।। 277
जगन्मध्ये सर्वयोनिर्योनिमध्ये चराचरम्।
बिन्दुर्भिद्यति नादेन तत्काले त्रीण्यणूद्भवम्।। 278
अनादिकाले त्रिधात्मानं शक्तिभेदोदयं भवेत्।
अनादिकाले क्रियात्मानं कुटिला कुण्डलिनां स्थितम्।। 279

अष्टाविंश... तत्ववाद वेदान्तपक्षकम्।
अनादिकाले क्रियात्मानं कुटिला कुण्डलिनां स्थितम्।। 280
बिन्दुशक्तिबिभेदांशे बैन्दवं भावमाचरेत्।
तत्काले मलसम्बन्धं तत्सृष्टयादि तथोदितम्।। 281

अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रनिरोधी च नादो नादान्त एव च ।। 282
शक्तिश्च व्यापिनी चैव व्योमरूपा तथैव च।
अनन्ता च तथानाथा नाश्रिता समना तथा ।। 283
उन्मना च तदनन्दश्च पराक्तिः परान्तकम्।
परशिवस्तदन्तश्च शाम्भवं गुरुपादुका ।। 284

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शिवः शाम्भव इति ज्ञेयो द्वाविंशद्भेद उच्यते । 285A

सर्वावस्थाविनिर्मुक्तं गुरुरूपं परात्परम् ।
गुह्यं च शाम्भवं द्वेधा गुह्याद्गुह्यं परात्परम् ।। 286
अवस्थापरमिदं प्रोक्तं श्रृणु देवि वरानने ।
अवस्थाष्टोत्तरशतं शुद्धावस्था दशाधिका ।। 287
केवलः सकलः शुद्धः अवस्था त्रिविधा मता ।
चतुर्थका च तुर्या च जाग्रातीतं च स्वप्नका ।। 288
तुर्यजाग्रमतीतं च जाग्रतुर्यः सुयोनकम् ।
अवस्थाष्टोत्तरशतं शुद्धावस्था दशाधिका ।। 289

शरीरमर्थं प्राणांश्च सद्गुरुभ्यो निवेदयेत् ।
दीर्घदण्डनमस्कारं नित्यं स्याद्गुरुसन्निधौ ।। 290
पश्चात्तिष्ठेच्च तत्प्रोक्तं शिवहस्तस्थिरं भवेत् ।
करुणा दर्शिनी भावात्पुण्यपापद्वयं हरम् ।। 291
श्रीपदं शिरसाऽऽराध्यं सोऽहमस्मीति भावयेत् ।
जीवन्मुक्तिः परामुक्तिस्तत्र संभावना द्वयम् ।। 292
शिवोऽहमस्मीति संचिन्त्य शिवज्ञानं प्रकाशितम् ।
शिवज्ञानं महाज्ञानं सोऽहमस्मीति भावितम् ।। 293
तत्पदं परमं गुह्यं तत्पदं परमं गुहा ।
तत्पदं परमं तत्वं तत्पदं सत्यशाम्भवम् ।। 294
तत्पदं परमं विद्यात्तत्पदं परमं गुरुम् ।
प्राक्पदं तत्पदं प्रोक्तं तस्मिन्सर्वं प्रतिष्ठितम् ।। 295
तत्पदं परमव्यक्तं शुद्धशैवमिति स्मृतम् ।
त्वंपदमात्मरूपं तु तत्पदं परमात्मनः ।। 296
असिपदं तयोरैक्यमेवं तत्वमसिक्रमम् ।
असिरूपं शिवरूपं द्वयोरैक्यं पकाशितम् ।। 297
तथा बद्धः स्थितः पाशैः यथा बद्धः तथा नरः ।
सर्वोपाधि विनिर्मुक्तं तत्पदार्थप्रकाशकम् ।। 298

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पाशबद्धः तथा जीवः पाशमुक्तः तदा शिवः ।
त्वं पदं तु अशुद्धयर्थं सर्वोपाधिसमन्वितम् ।। 299
उपाधिशून्य जीवात्मा .... र्थस्य शुद्धिमान् ।
तत्सर्वं देहयोर्व्याप्तं जगदेतत् चराचरम् ।। 300
त्रिपदं त्रीणि खण्डान्यकारोकारमकारकम् ? ।
तुर्यगण्यः स्तथाोबिन्दुरकारादिजमादिकम् ? ।। 301
तुर्यातीतस्तथा नादो नादान्तं परमं पदम् ।
जाग्रत्स्थाने तथा पञ्च पञ्चावस्थाः परः शिवः ।। 302
विन्दुनादकलान्तस्थं समनाशक्तिरुद्भवम् ।
समनान्तं सर्वतत्वं विद्यादध्यर्थकारणम् ।। 303
समनान्तं पाशजालमुन्मन्यन्ते परः शिवम् ।
परशिवस्तत्पराकारं परा ... ... शीरकम् ।। 304
व्योमाकारं महाशून्यमनन्तं गुरुरूपकम् ।
परात्परतरं ज्ञेयं गुरुरूपं प्रकाशकम् ।। 305
श्रृणु देवि वरारोहे त्वंपदं त्वात्मरूपकम् ।
आत्मरूपं तथाभेदं त्रिविधं पाशबन्धकम् ।। 306
आणवं मायया रूपं काम्यं मायेयकं त्विति ।
तिरोधानकराः पञ्च मलाः पाशं यदात्मनः ।। 307
जगच्चित्रं समालिख्ये स्वात्मकूलिकयात्मनि ।
स्वयमेव समालिख्य प्रीणाति परमेश्वरः ।। 308

त्वं तदस्येति तन्मध्ये मोचनं शुद्धमात्मनः ।
तत्वमस्येति यद्वाक्यं सोऽहमस्मि प्रभावितम् ।। 309
त्वंपदमात्मरूपं तु तत्पदं परमात्मनः ।
असि पदं तयोरैक्यमेवं तत्वमसिक्रमम् ।। 310
असिपदं शिवरूपं द्वयोरैक्यं प्रकाशितम् ।
पाशबद्धस्तथा जीवः पाशमुक्तस्तदा शिवः ।। 311

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्वं पदं तु अशुद्ध्यर्थं सर्वोपाधिसमन्वितम्।
उपाधिशून्यजीवात्मा ... र्थस्य शुद्धिमान्।। 312
तत्सर्वं देहयोर्व्याप्तं जगदेतच्चराचम्। 313A

त्रिधात्मत्वं पदव्याप्तं त्रिधात्मत्वमवस्थितम्।
त्रिधात्मासि पदं प्राप्तं नवात्मभेदमिति स्थितम्।। 314
त्रिपदी शोधनं प्रोक्तं लक्षणा च त्रिधा स्थिता।
जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा त्रिधा।। 315
त्रिपदाः शुद्धयो ज्ञेयास्त्रिपदार्थस्वशोधनम्।
मञ्चः क्रोशति गङ्गायां घोषः प्रवसतीति च।। 316
तस्मान्मूढैस्तु या प्रोक्ता विज्ञानद्वयकारणम्।
तत्तन्मध्यस्थिताः पुंसो घोषयन्ति स्थितिं कुरु।। 317
एतत्प्रकरणैर्युक्तः सर्वदेहस्थितो गुरुः।
तस्मान्मूढमतिः पुंसो वाचयित्वा स बोधकः।। 318
यथा कर्मस्थितो देही कुर्याद्देहादि कारकम्।
इदं प्रोक्तं तथा ब्रह्म शोधनं लक्षणा जहत्।। 319
शोणतिष्ठति श्वेतस्तु धावतीत्यर्थको जवात्।
तथैव परप्रोक्तेन प्रकाशेनात्मबोधकम्।। 320
एतद्भावं तु सायुज्यं पशुपत्यैक्यसंस्थितम्।
सोऽयं देवदत्त इति जहदजहल्लक्षणा।। 321
त्रिदशैकः पुमान्व्याप्तः शिवसायुज्यमाप्नुयात्।
एवं तत्त्रिपदं शुद्धं लक्षणार्थं तदुच्यते।। 322
शिवानन्दं महादेवि सत्यं ज्ञानमनन्तकम्।
आनन्दान्तस्थितिप्राप्तेस्तत्स्वरूपं प्रकाशितम्।। 323
सर्वं सत्यं ज्ञानमनन्तं आनन्दं चतुरुद्भवम्।
सत्यात्मतत्परज्ञानशिवानन्दस्त्रिधा गुणाः।। 324
आनन्द ... क्तयो योज्यं तत्प्राप्तं सद्गुरोः पदम्।
स्वरूपं त ... पञ्चगुणत्रय विभूतयः।। 325

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

एतच्चतुः प्रकारार्थं सत्यादिगुणसंपदम्।
रूपं गन्धं गुणं शोभा यथा उद्भवमुत्पलम्।। 326
तथैवेत्यादि तद्भेदं स्वरूपं तस्य उद्भवम्।
ज्ञानज्ञेयज्ञातृकं च त्रिपदार्थं स्वमुच्यते।। 327
तस्मात्स्वरूपं सर्वत्र प्रकाशानन्दविग्रहम्।
तत्प्राप्तिस्तत्परा मुक्तिः शिवजीवैक्यसम्भवम्।। 328
सदा .... .यन्तु संप्राप्तिः शिवसायुज्यमाप्नुयात्। 329A

षट्त्रिंशत्तत्वबोधार्थे आत्मरूपं प्रकाशितम्।
धातुरूपे स्थितं देहं मूलरूपोऽयमुच्यते।। 330
पुर्यष्टके स्थितं सूक्ष्मं प्रकृतित्रीणि देहजम्।
प्राणदेहं ततः पश्चात् धमां मोहिनिदेहजम् ?।। 331
पञ्चकंचुकयोर्देहं परित्यज्य स्वरूपकम्।
पञ्चभूतस्थितं देहं धातुरूपं प्रकल्पितम्।। 332
रसरुधिरमांसास्थि मेदोमज्ञाशुक्लकम्।
सप्तधातुं परित्यज्य श्रोत्रादि पञ्चकं त्यजेत्।। 333
वागादि पञ्चकं त्याज्यं शब्दादि पञ्चकं त्यजेत्।
वागादिपञ्चकं त्याज्यं शब्दादि पुरुषपञ्चकम्।। 334
पुरुषार्थं परित्यज्य केनलातीत सम्भवम्।
एतस्त्तर्वं परित्यज्य जाग्रज्जाग्रमिति स्थितम्। 335
विद्या तत्वं परित्यज्य जाग्रस्वप्नस्थितं भवेत्।
शिवतत्वं परित्यज्य मायामोहिनिसम्भवम्।। 336
तज्जाग्रत्सुप्तिर्यो भावः साक्षी पुरुषतत्वकः।
पुरुषार्थं परित्यज्य केवलातीत सम्भवम्।। 337
जाग्रज्जाग्रादिकावस्था तिरोधादिमलक्षया।
तिरोधाय जाग्रजाग्रे मायेयं जाग्रस्वप्नकम्।। 338
सुप्तिर्जगत्कर्म स्यान्मोहिनीजयात् ...।
जाग्रातीताणवं बन्धं तत्याज्यमानोनिरिम्।। 339

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ए ... तत्वकः।
त्रिवह्यकीं ब्रह्मार्थमेकीभावस्थितं नहि॥ 340
तस्मात् ....प्रज्ञा तदात्मा परमंस्थितः।
तत्कालप ... ना त्वस्यकारणम्॥ 341
प्रज्ञाभावसंसिद्धं शुद्धकेवलसंस्थितम्। 342A
जाग्रं तुर्यं चतुर्थं च तत्कालपरपञ्चकम्।
परव्योमं तु षष्टं च परावस्था तु सप्तमम्॥ 343
परमव्योग्नि सिद्ध्यर्थं जीवन्मुक्तिप्रकाशकम्।
तत्प्रकाशकचैतन्यं परमात्मन्यवस्थितम्॥ 344
परावस्थाप्रकाशस्तु अवस्थातीत गोचरम्।
आकाशशरीरं ब्रह्म तुर्यातीतं परं शिवम्॥ 345

परव्योमं तु षष्टं च परावस्था तु सप्तमम्।
विश्वग्रासाष्टमं चैव उपशान्तो नवस्तथा॥ 346
शिवभ्रष्टा दशं चैव वाक्यावस्था समीरिता।
अणुर्महत्वं तद्व्याप्तं जीवात्मपरयोदितम्॥ 347
एतदर्थं तद्र्थं च तत्पदं परमं पदम्।
विश्वग्रासं परं गुह्यं सर्वात्मशिवमुद्भवम्॥ 348

विश्वग्रासं परं गुह्यं सर्वात्मशिवमुद्भवम्।
तत्सर्वं व्याप्तिसंयुक्तं तच्छून्यं शान्तिसम्भवम्॥ 349

तत्सर्वं व्याप्तिसंयुक्तं तच्छून्यं शान्तिसम्भवम्।
तच्छिवावस्थितं शान्तं शान्त्यतीतं परात्परम्॥ 350
उपशान्तिर्ज्ञप्तितः प्राप्तं परजीवैक्यसाधनम्।
आत्मा परशिवं चैते त्रिपदार्थत्रिशोधनम्॥ 351

ज्ञानज्ञेयं ज्ञातृकान्तं त्रिपदार्थं समुच्यते।
तस्मात् स्वरूपं सर्वत्र प्रकाशानन्द विग्रहम्॥ 352

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्प्राप्तिः तत्परामुक्तिः शिवजीवैक्य सम्भवम्।
द्वयोः एक्यं तु संप्राप्ते पराप ..... पः ।। 353
आसिपदं शिवरूपं द्वयोः ऐक्यं प्रकाशितम्।
रक्तं शुक्लं द्विधामिश्रं प्रभाकरप्रकाशकम्। 354
पदं स्थितं ... ...

जाग्रजाग्रस्थितं ब्रह्मा जाग्रत्स्वप्नस्थितो हरिः।
जाग्रसुप्तिस्थितो रुद्रस्तमसा मोहिनी तथा ।। 355
जाग्रतुर्यस्थितेशस्तु ... ... तद्वन्ध।
गुरुकारुण्यमात्रेण वं मलोदयम् ।। 356
... ... प्रकाशार्थं जीवचैतन्यरूपकम्।
जाग्र ... ... प्रोक्तं तुर्यात्मसम्भवम् ।। 357
त्वं पदमात्मसम्भवम्।
उपाधिशून्यजीवात्मा त्वं पदार्थस्य शुद्धिमान् ।। 358

देव्युवाच-

परमेश महेशान परात्पर परःशिव।
सिद्धान्तमार्गसम्बोधं किंप्रकारं तदुच्यताम् ।। 359

ईश्वर अवाच-

श्रृणु देवि महाभागे शिवसिद्धान्तलक्षणम्।
पाशः पशुः पतिर्ज्ञेयं त्रिपदार्थं त्रिनिर्णयम् ।। 360
पाशः पशुः पतिर्मध्ये तृतीयेच्छा तु दीक्षया।
नवमं चैव सिद्धान्ताधिकारो भवतोदितः ।। 361
तस्माद्दशविधा दीक्षा पशुपाशपतिक्रमात् ।। 362A
प्रथमं तत्वरूपं तु द्वितीयं तत्वदर्शनम्।
तृतीयं तत्वशुद्ध्यर्थं चतुर्थं चात्मरूपकम् ।। 363
पञ्चमं चात्मदृश्यं तु षष्टं चाप्यात्मशोधनम्।
सर्वतत्वं चतुर्भेदं मायाकुण्डलिनोद्भवम् ।। 364
पूर्वोक्तस्य स्वकर्तव्यं तत्वत्रयविशेषतः।
तत्वरूपमिदं तत्र तत्वदर्शनमावनम् ।। 365

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्वशुद्धिः पृथग्भावं तत्वशून्यस्थितिं कुरु।
अरूपा वर्णचैतन्यमविकारान्तगोचरम् ॥
अभिन्नभिन्नरूपत्वं तत्वमात्मस्वरूपकम्।
अविकारोत्पन्नया तत्र प्रज्ञात्वं नाणुरूपकम् ॥
तद्व्याप्तं चेतनारूपं तत्सर्वं सुप्रकाशितम्।
तद्व्योमसम्भवत्यर्थं तदवस्थात्मशोधनम् ॥
रूपारूपं द्विधा शून्यं तुर्यातीतं परं शिवम्।
तत्पदं परमं स्थाणुं तत्वातीतं परं शिवम् ॥

(अथ शिवदर्शनविवेकः)

अणोरणीयान्महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः।
उपाधिशून्यं स्वयमात्ममध्ये प्रकाशते ज्ञप्तिपरानुभावः ॥
स्वजीवपरयोरैक्यं शिवयोगं शिवोद्भवम्।
दशावस्थामतिक्रान्तं ... ... मशनम् ॥
स्वरूपसत्यादिगुणं वाक्यलक्षणशोधनम्।
सत्यानन्दमहाज्योतिः शिवभोगानुभूतिकम् ॥
जीवावस्था परावस्था शिवावस्था नवान्तकम्।
नवतत्वं नवावस्था नवावस्थान्तगः शिवः ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
परबिन्दुः परो नादः परा शक्तिः परः शिवः ॥
नवतत्वलयस्थाने नृत्तानन्दमयो गुरुः।

शिवः शक्तिर्द्विधानादबिन्दुः सादाख्यपञ्चमः।
ईशो रुद्रस्तथा विष्णुर्वेधाग्रं मूर्तयो नव ॥
इच्छाज्ञानक्रियामाया पराबैन्दवतारकाः।
कुटिला कुण्डली भेदा नवप्रधानशक्तयः ॥
नवं प्राधान्यमूर्तिश्च नव वै बन्धकारणम्।

एतच्छक्तिमयं विश्वं विश्वातीतं परात्परम्।
शिवशक्तिद्विमध्यस्थे नादबिन्दुस्तथोदितः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नादबिन्दुद्विमध्यस्थे पञ्चसादाख्यमुद्भवम् ।
पञ्चसादाख्यमध्यस्थे अष्टविद्येश्वरोदितम् ॥ 380
अष्टविद्येश्वरमध्ये रुद्रभेदस्तथोदितः ।
रुद्रभेदस्वमध्यस्थे षट्कोटिविष्णुसम्भवः ॥ 381
षट्कोटिविष्णुमध्यस्थे शतकोटिब्रह्मणोद्भवः । 382A
इच्छाज्ञानक्रियामध्ये नवशक्तिस्तदुद्भवा ।
इच्छाज्ञानक्रियामध्ये ... हप्रभुमान्त्रिका ॥ 383
क्रियाशक्त्युद्भवं शेषं वाक्शक्तिः पञ्चमस्तथा ।
परापरात्पराकारं शिवशक्तिस्तदुद्भवा ॥ 384
नवं प्राधान्यमूर्तिश्च नव वै बन्ध कारणम् ।
असिपदं शिवरूपं द्वयोरैक्यं प्रकाशितम् ॥ 385
जीवंश्वरत्वरहितः केवलः स्वप्रभः शिवः ॥ 386A
अकारोकारमकारश्च शिरसि प्रणवस्य तु ।
शिवजीवपरैरैक्यं स्यात् त्रिपादीलक्ष्यलक्षणा ॥ 387
शबला परितं भेदं तन्मध्ये ... द्धरोत्तमम् ।
जीवः परः शिवो मुक्तिस्तद् व्याप्यस्तस्य लक्षणम् ॥ 388

तत्पदं तु शिकारं स्याद्वाकारं त्वंपदं तथा ।
असिशब्दो यकारश्च महावाक्यस्वरूपकम् ॥ 389
आत्मा परःशिवश्चैते त्रिपदार्थास्त्रिचेतनाः ।
त्रिशून्योदयसम्भिन्ने - त्वं तदसीतिसम्भवम् ॥ 390
... ... कादि मलत्रैधामस्याभिगुणत्रयः ।
त्वं तदस्येति तन्मध्ये मोचनं शुद्धमात्मनः ॥ 391

एवं तत्त्रिपदं शुद्धं लक्षणार्थं तदुच्यते ।
शिवानन्दं महादेवि सत्यज्ञानमनन्तकम् ॥ 392
आनन्दान्तस्थितज्ञप्तेस्तत्स्वरूपं प्रकाशितम् ।
सत्यं ज्ञानमनन्तं च आनन्दं चतुरुद्भवम् ॥ 393

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सत्यात्मतत्परज्ञानशिवानन्दं त्रिधा गुणाः।
आनन्दाः शक्तयो योज्यं तत्प्राप्तं सद्गुरोः पदम्॥
स्वरूपं तत्र रूपं च गुणत्रय विभूतयः।
एतच्चतुष्प्रकारार्थं सत्यादिगुणसंपदम्॥
रूपं गन्धं गुणं शोभा यथा उद्भवमुद्भवम्।
तथैवेत्यादि तद्भेदं स्वरूपं तस्य उद्भवम्॥
ज्ञानज्ञेयज्ञातृकान्तं त्रिपदार्थं समुच्यते।
तस्मात्स्वरूपं तत्रापि प्रकाशानन्दविग्रहम्॥
तत्प्राप्तिस्तत्परा परा मुक्तिः शिवजीवैक्यसम्भवम्।
मूखस्वप्नमिवाहुर्निरतिशयानन्दमात्मविज्ञानम्॥
सत्संप्रदायसिद्धं संततजातप्रकाशसद्भावम्॥

गोदोहमिषुपातं वा नयनोन्मीलमात्रकम्।
सकृत्परपदे युक्तं न पुनर्भावमाप्नुयात्॥
उदकेन विना सन्ध्या जपहोमैर्विना तपः।
सन्धीयते परे तत्वे सा सन्ध्या सद्भिरिष्यते॥
शास्त्रं कोटिषु कोटित्वं शिवज्ञानं तु दर्शनम्।
स्वानुभूत्या महात्मानः सदाभावं विचिन्तितम्।
शास्त्राचारकथं चैव कर्माचारविवर्जितम्॥
समयाचारेण किं कार्यं लोकोचारेण किं भवेत्।
सर्वाचारविनिर्मुक्तं स्वयमाचारमाप्नुयात्॥
नात्र पूजा नमस्कारो न जपो ध्यानमेव च।
केवलं ज्ञेयमित्युक्तं वेदितव्यं न किञ्चन॥

ज्ञानमुद्राविधिःप्रोक्तस्तत्र सन्मार्गदर्शनम्।
अनुभूतिप्रकर्तव्यं शिवानन्दोद्भवं सदा॥
द्वादशं मार्गसम्बन्धं श्रृणु देवि वरानने।
मुखं पीठं मठं दैवं वर्गदर्शनषष्टकम्॥
आसनं गिरि चित्तं गुहाचारो वर्णषष्टकम्।
एतन् द्वादशसन्मार्गप्रधानाचारमुत्तमम्॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मूर्तिरूपं मुखं ज्ञेयं दशन्धारं तु पीठकम् ।
पराशक्तिर्मठं प्रोक्तं दैवं तत्र परात्परम् ॥ 409
ज्ञानिनां वर्गमाश्रित्य शुद्धशैवस्य दर्शनम् ।
आसनं ज्ञानशक्त्यर्थं गिरिपञ्चाक्षरोऽलयम् ॥ 410
चित्तं बिन्दुस्वरूपं च उपशान्तिर्गुहा च वै ।
सर्वाचारविनिर्मुक्तं ज्ञानाचारप्रवर्तकम् ॥ 411
वर्णमध्यात्मवर्णं तु एतद् द्वादशमुच्यते ।

प्रासादस्य कला एतश्चतुर्विंशत्तथैव च ।
द्वाविंशदेकविंशच्च विंशदष्टादशं तथा ॥ 412
षोडशः पञ्चदशं च द्वादशो दशमो नव ।
अष्टमं पञ्चमं चैव कलाभेद इहोच्यते ॥ 413
अकारश्च उकारश्च मकारो बिन्दुरेव च ।
अर्धचन्द्रनिरोधी च नादो नादान्त एव च ॥ 414
शक्तिश्च व्यापिनी चैव व्योमरुपा तथैव च ।
अनन्ता च तथाऽनाथाऽनाश्रिता समना तथा ॥ 415
उन्मना च तदन्तश्च परा शक्तिः परान्तकः ।
परशिवस्तदन्तश्च शाम्भवं गुरुपादुका ॥ 416
शिवः शाम्भव एव स्याद् द्वाविंशद्भेद उच्यते ।
शिवान्तान्तैकविंशच्च शिवान्तो विंशत्कला तथा ॥ 417
परान्ताष्टादश प्रोक्ता उन्मन्यन्ते तु षोडश ।
समनान्ते षञ्चदशः विना शैवं चतुष्कलाः ॥ 418
कला द्वादश एवोक्तास्तत्प्रासादकलाः स्मृताः । 419A

इत्यथटाविंशतिः शास्त्रैरुपभेदागमक्रमम् ।
चतुर्विंशच्छतद्वेधा तत्तद्भेदापरिमिताः ॥ 420
इत्यष्टाविंशतिभेदाः शैवसिद्धान्तकल्पना ।
पूर्वाष्टाविंशतिः प्रोक्ताश्चतुष्पाज्ज्ञेयकल्पनाः ॥ 421
अन्यथा आगमाः प्रोक्ताः शिवधर्मोत्तरं द्विधा ।
नानाचारप्रवृत्यर्था नानासिद्धान्तिभेदकाः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पौष्कारादिज्ञानसांख्यार्थास्तत्वसारादिभेदकाः।
अनेकार्थागमाः सांख्याश्चतुष्पादाः शैवनिर्णयाः॥
देवीकालोत्तरस्कन्दकालोत्तर (द्वि) शतोत्तराः।
सर्वज्ञानोत्तराः सांख्या इत्याद्या योगसांख्यकाः॥
नानाशैवप्रवृच्यर्था नानाशैवागमोदिताः।
मन्त्रतन्त्रक्रियायोगा न शैवार्था ... ज्ञेयाः॥

नन्दिकेश परं गुह्यं योगज्ञानप्रवर्तकम्।
शिवसांख्यं योगसांख्यं सांख्यभेदागमद्वयम्॥
निर्वाणसारसांख्यैकं योगसांख्यं द्वितीयकम्।
तत्वसारं त्रिधा भेदं देवविघ्नेश्वरगुहात्॥
कारणं भार्गवं शुद्धं कालकण्ठं ततोऽधिकम्।
शैवभेदागमा इत्थं साक्षान्मोक्षप्रवेशकम्॥
पूर्वकाण्डमिति प्रोक्तं सूक्ष्मं सिद्धान्तशाम्भवम्।
उत्तरं काण्डकं पश्चात् परमं कामिकादिकम्॥

शैवं शिवाद्वितं चैव शिवसंमेळनं त्रिधा।
पश्चात्पाशुपतं चैव कालामुखमहाव्रतम्॥
वामभैरवयोर्भेदाः शैवस्याभ्यन्तराष्टकाः।
ऊर्ध्वं तु शैवं प्रथममनादि शैवं द्वितीयम्॥
आदिशैवं तृतीयं तु चतुर्थमनुशैवकम्।
अवान्तरं पञ्चमं च मिश्रशैवं तु षष्ठकम्॥
भेदशैवं तथा सप्त गुणशैवं तथाष्टमम्।
आज्ञाशैवं तु नवमं दशमं योगशैवकम्॥
एकादशं ज्ञानशैवं द्वादशं शुद्धशैवकम्।
ईश्वरैक्यं तथाभिन्नमध्वशैवं प्रवर्तकम्॥

सर्वतत्वं चतुर्भेदं मायाकुण्डलिनोद्भवम्।
पूर्वोक्तस्य सुकर्तव्यं तत्वत्रयविशेषतः॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्वरूपमतस्तत्र तत्वदर्शनभावतः।
तत्वशुद्धिः पृथक्भावं तत्वलीनस्थितिं कुरु ॥ 436
अरूपापन्नचैतन्यमविकारान्तगोचरम्।
अभिन्नाभिन्नशून्यं च इत्थमात्मस्वरूपकम् ॥ 437
तद्व्याप्तं चेतनारूपं तत्सर्वं सुप्रदर्शनम्।
तद्व्योम सम्भवत्यर्थं तदवस्थात्मशोधनम् ॥ 438
रूपारूपं तदाशून्यं तुर्यातीतं परं शिवम्।
तत्वदं परमं स्थाणुं तत्वातीतं परं शिवम् ॥ 439
अणोरणीयान्महतो महीयान् आत्मा गुहायां निहितोऽप्यनन्तः।
उपाधिशून्यं स्वयमात्ममध्ये प्रकाशकं ज्ञप्तिपरानुभावम् ॥ 440
स्वजीव परयोरैक्यं शिवयोगं शिवोद्भवम्।
सत्यानन्दमहाज्योतिः शिवभोगानुभूतिकम् ॥ 441
सनकादिमुनीनां तु वटछायाप्रबोधकम्।
तज्ज्ञानदीक्षया वेद्यं सत्यं च मौनमुद्रया ॥ 442
तज्ज्ञानं शिवसामर्थ्यं शिवभोग इहोच्यते।
इत्येवं हि महादेवीं प्रतिवक्ति महेश्वरः ॥ 443

आदिकारणं मृद्रूपं तच्चक्रं सहकारणम्।
कुलालोऽस्य निमित्तं स्यात् त्रिभिः मृद्भाण्डसम्भवः ॥ 444
तदेवं ग्रन्थिमृद्रपं कुण्डली चक्रसंस्थितम्।
परमेश कुलालेन क्रियते तच्चाराचरम् ॥ 445
इच्छा ज्ञान क्रिया शक्तिः इति व्याप्तस्य कारणम्।
ईश्वराच्छुद्धविद्या स्यात् ततो माया समुद्भवः ॥ 446

पृथ्व्यादिभूतशक्त्यर्थं निवृत्यादि पञ्चमाः कला।
भूतांशं पञ्चविंशेति तद्देहोत्पत्तिकारणम् ॥ 447
पृथिवी वारिवाखग्नि गगनादीनि कीर्तितम्।
अस्थिमांसत्वचं मेदो रोम मेदिनिपञ्चकम् ॥ 448
लाला मूत्रं तथा शुल्कं शोणितं मज्ञपञ्चमम्।
क्षुधा तृष्णा तथा निद्रा आलस्यं मज्ञपञ्चमम ॥ 449

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

क्षुधा तृष्णा तथा निद्रा आलस्यं रतमेव च।
धावनं लङ्घनं पातं कुञ्चनं च प्रसारणम् ।।
रागद्वेषौ तथा लज्जा लोभरोगौ तथैव च।
एवं च पञ्चविंशार्थं भूतांशं बाह्यतत्त्वकम् ।।
एवं तत्त्वक्रमं देहं भूतकारप्रवर्तकम् ।
श्रुतित्वक्घ्राणजिह्वाक्षिनामज्ञानेन्द्रियैस्तथा ।।
अहङ्कारमनो बुद्धि चित्तैराभ्यन्तरैः स्थितम् ।
अन्नप्राणमनोविज्ञानानन्दैः पञ्चकोशकम् ।।
प्राणापानव्यानोदानसमानाः पञ्च वायवः ।
नागश्च कूर्मः क्रकरो देवदत्तो धनंजयः ।।
अन्तर्यामी तथा मुख्यः प्रपञ्चो वैरगस्तथा।
एवं चतुर्दश वायुर्ज्ञानाज्ञानव्यवस्थितः ।।
प्राणादिपञ्चमो वायुर्ज्ञानाज्ञानव्यवस्थितः ।
प्राणादिपञ्चमो वायुर्ज्ञानवायुस्तदुच्यते ।।
अन्तर्यामी तथा भेदश्चतुर्थावस्था मरुत् प्रिये।
रागादिपञ्चको वायुः क्रियावायुः प्रकीर्तितः ।।
प्राणवायुस्तथा मध्ये अन्यवायुः स्वबन्धनम् ।
आणवादिमलं त्रेधा सात्विकादिगुणास्त्रिधा ।।
मूलाधारस्वाधिष्ठानमणिपूरविंशुद्धिकाः ।
अनाहताज्ञास्थानं षडाधारं ब्रह्मरन्ध्रकैः ।।
ब्रह्मा विष्णुश्च रुद्रश्च ईशः शक्तिः सदाशिवः ।
जाग्रत्स्वप्नसुषुप्तिश्च तुर्यातीतं च पञ्चमम् ।
एवं पञ्चमयो देह एवं भौतिकमुच्यते : ।।
भूतवर्णं च कोशं च बाह्या वै पञ्चविंशतिः ।
आभ्यन्तरं पञ्चविशत् वायुभेदाश्चतुर्दशः ।।
मलत्रयं गुणास्त्रेधा आधारषट्कमात्मनः ।
अवस्था पञ्चकेत्यर्थं षट् त्रिंशत्षष्टिकं तथा ।।
एतत्सामान्यतत्वार्थदेहोत्पत्तिः स्वसाधनम् ।
देहोत्पत्तिस्तथा तत्त्वं चतुष्कोटिस्तथा पुनः ।।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्त्वरूपं श्रृणुत्वं वै हृद्वयापकमनुत्तमम् ।
स्वर्णश्वेतं च रक्तं च कृष्णधूम्रस्वरूपकम् ।। 465
श्रोत्रादि पञ्चमं रूपं धूम्रकृष्णादि पञ्चमम् ।
मनो बुद्धिरहंकारश्चित्तं पुरुषतत्त्वकम् ।। 466
श्वेतं रक्तं तमः शुभ्र तमः शुभ्रं द्विमिश्रकम् ।
एकैकमिन्द्रियग्रह्यावस्थं पुरुषतत्त्वकम् ।। 467
श्वेतान्तः करणं व्याप्तं व्याप्तभेदमनेकधा ।
आत्मा श्वेतज अव्यक्तः कृष्णरक्तार्थश्वेतजः ।। 468
महान्शुवर्णः कञ्चुको धूम्रः प्रकृतिः शङ्कुतुल्यकाः ।?
विकृतिस्तिमिराकारा मनोन्मनी स्फटिकोपमा ।। 469
उन्मनी निस्तुलाभासा नवशक्तेर्नवोदयः ।
नागस्तु तिमिराकारो दोषश्चाति तमस्तथा ।। 470
त्रिविधस्तत्त्वसम्बन्धस्वर्णश्वेततमोमयम् ।
अविद्या धूम्रभासा स्यात्कलाभा कुन्दपुष्पभा ।। 471
नियतिः स्वर्णवर्णा च नियमस्तु तथागुणः ।
त्रिकालस्त्रिगुणो वर्णः सृष्ट्यादिभूतवर्णकम् ।। 472
सृष्टिकारणयोर्वर्णस्तथा वर्णस्वरूपकम् ।
मायातितिमिरा शुद्धविंद्या हिरण्मया ।। 473
महेशस्तिमिराभासः सादाख्यः स्फटिकोपमः ।
बिन्दुनादं द्विधारूपं श्वेतरक्तप्रकाशकम् ।। 474
नादोऽन्तः कोमलाकारः कुटिला भास्वरा सदा ।
शिवशक्तिर्द्विधाभासा अकलंङ्कशशिप्रभा ।। 475
तटिदाकारवान्श्रेष्ठः सर्वात्मा स्वप्रकाशकः ।
एवं तत्त्वस्वरूपार्थ एवं तत्त्वप्रभुः शिवः ।। 476

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE